# योगवासिष्ठः/प्रकरणम् ६ (निर्वाणप्रकरणस्य उत्तरार्धम्)/सर्गः ०८२



वाल्मीकिः

द्व्यशीतितमः सर्गः ८२

श्रीराम उवाच ।

किमेतद्भगवन्सर्वनाशे नृत्यति केन सा ।

किं शूर्पफलकुम्भाद्यस्तस्याः स्रग्दामधारणम् ।। १

किं नष्टं त्रिजगद्भूयः किं काल्या देहसंस्थितम् ।

परिनृत्यति निर्वाणं कथं पुनरुपागतम् ।। २

श्रीवसिष्ठ उवाच ।

नासौ पुमान्न चासौ स्त्री न तन्नृत्तं न तावुभौ ।

तथाभूते तथाचारे आकृती न च ते तयोः ।। ३

अनादिचिन्मात्रनभो यत्तत्कारणकारणम् ।

अनन्तं शान्तमाभासमात्रमव्ययमाततम् ।। ४

शिवं तत्सच्छिवं साक्षाल्लक्ष्यते भैरवाकृति ।

तथास्थितो जगच्छान्तौ परमाकाश एव सः ।। ५

चेतनत्वात्तथाभूतस्वभावविभवादृते ।

स्थातुं न युज्यते तस्य यथा हेम्नो निराकृति ।। ६

कथमास्तां वद प्राज्ञ चिन्मात्रं चेतनं विना ।

कथमास्तां वद प्राज्ञ मरिचं तिक्ततां विना ।। ७

कटकादि विना हेम कथमास्तां विलोच्यताम् ।

कथं स्वभावेन विना पदार्थस्य भवेत्स्थितिः ।। ८

विना तिष्ठति माधुर्यं कथयेक्षुरसः कथम् ।
निर्माधुर्यश्च यस्त्विक्षुरसो न हि स तद्रसः ।। ९
अचेतनं यच्चिन्मात्रं न तच्चिन्मात्रमुच्यते ।
न च चिन्मात्रनभसो नष्टं क्वचन युज्यते ।। १०
स्वसत्तामात्रकादन्यत्किंचित्तस्य न युज्यते ।
अन्यत्वमुररीकर्तुं व्योमानन्यमसौ किल ।। ११
तस्मात्तस्य यदक्षुब्धं सत्तामात्रं स्वभासनम् ।
अनादिमध्यपर्यन्तं सर्वशक्तिमयात्मकम् ।। १२
तदेतत्त्रिजगत्सर्गकल्पान्तौ व्योम भूर्दिशः ।
नाश उत्पादनं नाम विनानाभासनं नभः ।। १३
जननं मरणं मायामोहं मान्द्यमवस्तुता ।
वस्तुता च विवेकश्च बन्धो मोक्षः शुभाशुभे ।। १४
विद्याऽविद्या विदेहत्वं सदेहत्वं क्षणश्चिरम् ।
चञ्चलत्वं स्थिरत्वं वा त्वं चाहं चेतरश्च तत् ।। १५
सदसच्चाथ सदसन्मौर्ख्यं पाण्डित्यमेव च ।
देशकालक्रियाद्रव्यकलनाकेलिकल्पनम् ।। १६
रूपालोकमनस्कारकर्मबुद्धीन्द्रियात्मकम् ।
तेजोवार्यनिलाकाशपृथ्व्यादिकमिदं ततम् ।। १७
एतत्सर्वमसौ शुद्धचिदाकाशो निरामयः ।
अजहद्व्योमतामेव सर्वात्मैवैवमास्थितः ।। १८
एतत्सर्वं च विमलं खमेवात्र न संशयः ।
अस्मादनन्यत्स्वप्नादिर्दृष्टान्तोऽत्राविखण्डितः ।। १९
चिन्मयः परमाकाशो य एव कथितो मया ।
एषोऽसौ शिव इत्युक्तो भवत्येष सनातनः ।। २०
स एष हरिरित्यास्ते भवत्येष पितामहः ।
चन्द्रोऽर्क इन्द्रो वरुणो यमो वैश्रवणोऽनलः ।। २१

अनिलो जलदोम्भोधिर्ह्यो यद्वस्त्वस्ति नास्ति च ।

इत्येते चिन्मयाकाशकोशलेशाः स्फुरन्त्यलम् ।। २२

एवंविधाभिः संज्ञाभिर्मुधाभावनयेदृशाः ।

स्वभावमात्रबोधेन भवन्त्येते तु तादृशाः ।। २३

अबोधो बोध इत्येवं चिद्व्योमैवात्मनि स्थितम् ।

तस्माद्भेदो द्वैतमैक्यं नास्त्येवेति प्रशाम्यताम् ।। २४

तावत्तरङ्गत्वमयं करोति

जीवः स्वसंसारमहासमुद्रे ।

यावन्न जानाति परं स्वभावं

निरामयं तन्मयतामुपेतः ।। २५

ज्ञाने तु शान्तिं स तथोपयाति

यथा न सोऽब्धिर्न तरङ्गकोऽसौ ।

यथास्थितं सर्वमिदं च शान्तं

भवत्यनन्तं परमेव तस्य ।। २६

इत्यार्षे श्रीवासिष्ठमहारामायणे वाल्मीकीये दे० मो० निर्वाणप्रकरणे उ० पाषा० शिवस्वरूपवर्णनं नाम द्व्यशीतितमः सर्गः ।।८२।।